# कृषिः सर्वार्थसाधिका।

---

**Que.1. उदाहरणं दृष्ट्वा पदच्छेदं लिखत-** **[Marks :(2)]**

**१) इतोऽप्यन्यत् - इतः + अपि + अन्यत्।**

**क) कुतोऽप्ययम् - -------- + ------ + ...........।**

**ख) ततोऽप्यसौ - -------- + ------ + ...........।**

**ग) ततोऽप्यन्यः - -------- + ------ + ...........।**

**२) पुष्पाण्यपि - पुष्पाणि+ अपि।**

**क) गृहाण्यपि - ---------- + ------।**

**ख) सर्वाण्यपि - ---------- + ------।**

**ग) रम्याण्यपि ----------- + ------।**

**३) अवलम्ब्यैव - अवलम्ब्य + एव।**

**क) आरुह्यैव - ---------- + ------।**

**ख) आनीयैव - ---------- + ------।**

**ग) आगत्यैव - ----------- + -----।**

**४) जैवोर्वरकमेवोपयुज्यते -जैवोर्वरकम्+ एव +उपयुज्यते।**

**क) पुत्रमेवोपदिशति - ......... +............ + ...........।**

**ख) धनमेवोपकारकम् -........ +............ + ...........।**

**ग) वनमेवोपगम्यते - ........ +............ + ...........।**

**५) तदपि - तद् + अपि**

**क) एतदस्माकमपि - ............ + ...........।**

**ख) तदस्माकमपि - ............. + ...........।**

**Ans.** उदाहरणं दृष्ट्वा पदच्छेदं लिखत।

१ क) कुतः+ अपि + अयम्।

ख) ततः+ अपि + असौ।

ग) ततः+ अपि + अन्यः।

२ क) गृहाणि + अपि।

ख) सर्वाणि + अपि।

ग) रम्याणि + अपि।

३ क) आरुह्य+ एव।

ख) आनीय + एव।

ग) आगत्य + एव।

४ क) पुत्रम् + एव + उपदिशति।

ख) धनम् + एव + उपकारकम्।

ग) वनम् + एव + उपगम्यते।

५ क) एतद् + अस्माकमपि।

ख) तद् + अस्माकमपि।।

**Que.2. उदाहरणानुसारं कर्तरि कर्मणि च वाक्यानि विविच्य लिखत।** **[Marks :(1)]**

**उदा - अहं विद्यालयं गच्छामि। - कर्तरिप्रयोगः**

**मया विद्यालयः गम्यते। - कर्मणिप्रयोगः**

**बालः ग्रामं गच्छति। ----------------।**

**वामनः लतां पश्यति। ----------------।**

**उमेशेन चित्रं दृश्यते। ----------------।**

**उमेशः चित्रं पश्यति। ----------------।**

**लता पुस्तकं पठति। ----------------।**

**रमया पत्रं लिख्यते। ----------------।**

**सुकुमारेण पुस्तकं पठ्यते। ----------------।**

**रामेण वनं गम्यते। ----------------।**

**Ans.** बालः ग्रामं गच्छति। कर्तरिप्रयोगः

वामनः लतां पश्यति। कर्तरिप्रयोगः

उमेशेन चित्रं दृश्यते। कर्मणिप्रयोगः

उमेशः चित्रं पश्यति। कर्तरिप्रयोगः

लता पुस्तकं पठति। कर्तरिप्रयोगः

रमया पत्रं लिख्यते। कर्मणिप्रयोगः

सुकुमारेण पुस्तकं पठ्यते।    कर्मणिप्रयोगः

रामेण वनं गम्यते।    कर्मणिप्रयोगः

**Que.3. किं गणे न अन्तर्भवति?** **[Marks :(1)]**

**क) भेण्डः, मरीचम्, कदली**

**ख) सेवम्, कमलम्, दाडिमम्**

**ग) उर्वारुकम् , जपाकुसुमम्, पाटलम्**

**घ) उर्वारुकम्, नारङ्गम्, कर्कटी**

**ङ) सूर्यकान्तिः ,सूरणम्, शाकापुष्पम्**

**च) पारन्ती, शङ्खपुष्पम्, शिग्रुः**

**Ans.** क) कदली ।

ख) कमलम् ।

ग) उर्वारुकम्।

घ) नारङ्गम् ।

ङ) सूरणम्।

च) शिग्रुः।

**Que.4. मञ्जूषां पठित्वा शाकानां पुष्पाणां फलानाञ्च पट्टिकां करोतु।** **[Marks :(5)]**

**(जपाकुसुमं, सेवम्, भेण्डम्, आम्रम्, उर्वारुकम्, दाडिमम्, कमलम्, पाटलम्, कदलीफलम्,कर्कटी, केम्बुकम्, सूर्यकान्तिः)**

| **पुष्पाणि** | **फलानि** | **शाकानि** |
|---|---|---|
| | | |
| | | |
| | | |

**Ans.**

| पुष्पाणि | फलानि | शाकानि |
|---|---|---|
| जपाकुसुमं कमलम् सूर्यकान्तिः<br>पाटलम् | दाडिमम्<br>आम्रम्<br>कदलीफलम्<br>सेवम् | भेण्डम्<br>उर्वारुकम्<br>कर्कटी<br>केम्बुकम् |

**Que.5. खण्डिकां पठित्वा उत्तराणि लिखत।** **[Marks :(5)]**

**कृषिः मानवस्य जीवातुः भवति। जैवकृषिरीतिः उत्तमा इति पण्डितानामभिप्रायः। कृषेरभिवर्धनाय जैवोर्वरकाणि उत्तमानि। गोमूत्र- गोमय-पिण्याकादीनि जैवोर्वरकाणि। एते अधिकफलदानसमर्थाः भवन्ति। कीटानां निवारणाय कृषिक्षेत्रात् नातिदूरे पुष्पोद्यानं संरक्षणीयम्। पुष्पाणि कीटान् आकर्षन्ति। तेन कृषिसंरक्षणमपि भवति।**

**क) जैवोर्वरकाणि के?**

**ख) कीटानां नियन्त्रणाय किं करणीयम्?**

**ग) कानि कीटान् आकर्षन्ति?**

**घ) मानवजीवातुः कः?**

**Ans.** क) गोमूत्र- गोमय-पिण्याकादीनि जैवोर्वरकाणि भवन्ति।

ख) कीटानां निवारणाय कृषिक्षेत्रात् नातिदूरे पुष्पोद्यानं संरक्षणीयम्।

ग) पुष्पाणि कीटान् आकर्षन्ति।

घ) कृषिः मानवस्य जीवातुः भवति।

**Que.6. सम्भाषणांशं पठित्वा लघुटिप्पणीं लिखत-** **[Marks :(4)]**

**छात्राः - (कृषिकार्यालयं प्राप्य) महोदय! नमस्ते।**

**अधिकारी - नमो युष्मभ्यम्। भवन्तः कुतः आगच्छन्ति?**

**छात्राः - वयं समीपस्थात् विद्यालयात् आगताः।**

**अधिकारी - किमर्थमागताः?**

**छात्राः - वयं कृषिकार्यमधिकृत्य ज्ञातुमागताः।**

**अधिकारी - अस्तु। उत्तमम्। प्रश्नान् पृच्छन्तु।**

**छात्राः - श्रीमन् का जैवकृषिरीतिः?**

**अधिकारी - जैवोर्वरकाण्युपयुज्य क्रियमाणा कृषिरीतिः भवति जैवकृषिरीतिः।**

**छात्राः - जैवोर्वरकाणि कानि ?**

**अधिकारी - गोमयः गोमूत्रं, पिण्याकादीनि जैवोर्वरकाणि।**

**छात्राः - एभिः किं प्रयोजनम्?**

**अधिकारी - अधिकफललाभाय उत्तमं भवति।मृदः आर्द्रतां संरक्ष्यते च।**

**छात्राः - कीटानां निवारणाय किं कर्तुं शक्यते।?**

**अधिकारी - शाकक्षेत्रात् नातिदूरे किमपि पुष्पोद्यानं निर्मान्तु। तेन कीटाः सर्वे पुष्पाणां समीपं गच्छेयुः।**

**छात्राः - महान् धन्यवादः श्रीमन्।**

**अधिकारी - अस्तु। पुनः मिलामः।**

**Ans.** श्रद्धेयाः अंशाः-

आमुखम् - विषयप्रवेशः-विषयावतरणम्- आशयव्यक्तता- भाषाशुद्धिः

उचितस्य सम्भाषणस्य अङ्कः देयः।